**अधित्यका**, स्त्री, (अधिरूढ़ा पर्व्वतोपरिभागम् अधि+त्यकन् स्त्रियां टाप्।) पर्व्वतोपरिभूमिः। इत्यमरः॥ (उपत्यकाद्रेरासन्ना भूमिरूर्द्ध्वमधित्यका॥ अमरकोषः। यथा रघुवंशे,—"अधित्यकायामिव धातुमय्यां लोध्रद्रुमं सानुमतः प्रफुल्लं"॥)

**अधिपः**, त्रि, (अधिपाति रक्षति अधि+पा+क।) अधिपतिः। स्वामी। इत्यमरः॥ राजा। इति त्रिकाण्डशेषः॥ (यथा रघुवंशे—"अथ प्रजानामधिपः प्रभाते॥)

**अधिपतिः**, पुं, (अधिपाति रक्षति अधि+पा+डति।) प्रभुः। स्वामी। इति हलायुधः॥ (यथा रघुवंशे। "वचो निशम्याधिपतिर्दिवौकसां"॥)

**अधिभूः**, पुं, (अधि+भू+कर्त्तरि क्विप्।) स्वामी। प्रभुः। इत्यमरः॥

**अधिमासः**, पुं, (मासात् रविसंक्रान्तिमासादधिक मयूरव्यंसकादित्वात् समासः।) रविसंक्रान्तिद्वयमध्यवर्त्तिचान्द्रमासः। रविसंक्रान्तिशून्यशुक्लप्रतिपदादिदर्शान्तमासः। तत्पर्य्यायः। अधिकमासः २ असंक्रान्तिमासः ३ मलमासः ४ मलिम्लुचः ५ विनामकः ६ नपुंसकः ७। इति मलमासतत्त्वं॥

**अधिमांसकः**, पुं, (अधिकं मांसं यत्र सः, समासान्तः कः।) दन्तरोगविशेषः। यथा,—

"दन्तस्य पश्चिमे दन्ते
महान् शोथो महान् रुजः।
लालास्रावी कफकृतो
विज्ञेयः सोऽधिमांसकः"॥

इति भावप्रकाशः॥ अस्य चिकित्सा दन्तरोगशब्दे द्रष्टव्या॥

**अधिरथः**, पुं, (रथमधिरूढः अत्यादीति समासः।) कर्णपिता। स तु सूतजातिः। तस्य कर्म्म सारथ्यं। यथा। विवेशाधिरथो रङ्गं यष्टिप्राणो ह्वयन्निव। इति महाभारतं॥ (यथा हरिवंशे। "सत्रकर्म्मण्यतस्तापि सूतस्त्वधिरथस्तु वै। यः कर्णं प्रतिजग्राह तेन कर्णस्तु सूतजः"॥)

**अधिराज्यभाक्**, पुं, (अधिकं राज्यं कर्म्मधारयः, तत् भजते अधिराज्य+भज्+ण्वि उपपदसमासः।) अधिराट्। यथा। अत्यन्यान् पृथिवीपालान् पृथिव्यामधिराज्यभाक्। इति महाभारतं।

**अधिराट्**, [ज्] पुं, (आधिक्येन राजते अधि+राज्+कर्त्तरि क्विप्।) सम्राट्। चक्रवर्त्ती। इति महाभारतं॥ (यथा रघुवंशे। इति प्रगल्भं पुरुषाधिराजो मृगाधिराजस्य वचो निशम्य।)

**अधिरोहिणी**, स्त्री, (अधिरोहः आरोहणं तदेव साधनत्वेन विद्यतेऽस्य अधि+रोह+इन् स्त्रियां ङीप्।) (अधिरोहणी इति पाठे अधिरुह्यते अनया अधि+रुह+करणे ल्युट् स्त्रियां ङीप्।) वंशकाष्ठादिनिर्म्मितारोहणमार्गः। सिँड़ि इति भाषा। तत्पर्य्यायः। निःश्रेणिः २। इत्यमरः॥ निःश्रेणी ३। इति तट्टीका॥ अधिरोहणी इत्यपि पाठः॥

**अधिवचनं**, क्ली, (अधि+वच्+ल्युट्।) पक्षपातेन कथनं। "अधिकं वचनं पक्षपातेन वचनं" इति माधवाचार्य्यः।) नाम। संज्ञा। इति त्रिकाण्डशेषः॥

**अधिवासः**, पुं, (अधि+वस्+घञ्।) निवासः। धूपनादिभिः संस्कारः। इति मेदिनी॥ तद्द्रव्याणि। मृत्तिका १ गन्धः २ शिला ३ धान्यं ४ दूर्व्वा ५ पुष्पं ६ फलं ७ दधि ८ घृतं ९ स्वस्तिकं १० सिन्दूरं ११ शङ्खः १२ कज्जलं १३ रोचना १४ श्वेतसर्षपः १५ स्वर्णं १६ रौप्यं १७ ताम्रं १८ चामरं १९ दर्पणं २० दीपः २१ प्रशस्तपात्रं २२। इति भवदेवः॥ क्वचित् पुस्तके श्वेतसर्षपस्थाने सिद्धार्थं क्वचिच्च चामरस्थाने। तत्रानुष्ठानं। दुर्गापूजादोलयात्रायागादौ पूर्व्वदिने सायंकाले आचारात् संस्कारकर्म्मणि तद्दिने पूर्व्वाह्णे मन्त्रं पठित्वा क्रमेणोक्तद्रव्याणि आदौ देवादीनां ललाटे पश्चाद्भूमौ स्पर्शयित्वा प्रशस्तपात्रे स्थापयित्वा तत्पात्रं पूर्व्वोक्तक्रमेण वारत्रयं स्पर्शयेत्। द्रव्यविशेषेण संस्कारः। तत्र यजुर्व्वेदोक्तमन्त्राः त्रयोविंशतिद्रव्याणि च यथा। तैलहरिद्रां गृहीत्वा,—

"ॐ कोसि कतमोसि कस्मै त्वा काय त्वा सुश्लोकः सुमङ्गलः सत्यराजन्। अनया तैलहरिद्रया अस्य शुभाधिवासनमस्तु। एवं सर्व्वत्र"।१।

गन्धं गृहीत्वा,—

"ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीं। ईश्वरीं सर्व्वभूतानां तामिहोपह्वये श्रियं"।२।

महीं गृहीत्वा,—

"ॐ भूरसि भूमिरस्य दितिरसि विश्वधाया विश्वस्य भुवनस्य धर्त्रीं पृथिवीं यच्छ पृथिवीं दृꣳह पृथिवीं माहिꣳसीः"।३।

पुनर्गन्धेन गन्धद्वारामिति।

शिलां गृहीत्वा,—

"ॐ प्रपर्व्वतस्य वृषभस्य पृष्ठान्नावश्चरन्ति स्वसिच इयानाः ता आववृत्रन्नधरा गुदक्ता अहिं बुध्न्यमनुरीयमानाः। विष्णोर्विक्रमणमसि विष्णोर्विक्रान्तमसि विष्णोः क्रान्तमसि"।४।

धान्यं गृहीत्वा,—

"ॐ धान्यमसि धिनुहि देवान् धिनुहि यज्ञं धिनुहि यज्ञपतिं धिनुहि मां यज्ञन्यं"।५।

दूर्व्वां गृहीत्वा,—

"ॐ काण्डात् काण्डात् प्ररोहन्ती परुषः परुषः परि एवानो दूर्व्वे प्रतनु सहस्रेण शतेन च"।६।

पुष्पं गृहीत्वा,—

"ॐ श्रीश्च ते लक्ष्मीश्च पत्न्यौ अहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तं इष्णन्निषाण मुम्म इषाण सर्व्वलोकम्म इषाण"।७।

फलं गृहीत्वा,—

"ॐ याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्वꣳहसः"।८।

दधि गृहीत्वा,—

"ॐ दधिक्राव्णोऽकारिषं जिष्णोरश्वस्य वाजिनः। सुरभिणो मुखाकरोत् प्रणआयुꣳषितारिषत्"।९।

घृतं गृहीत्वा,—

"ॐ तेजोसि शुक्रमस्यमृतमसि धामनामासि प्रियं देवानामनाधृष्टं देवयजनमसि"।१०।

स्वस्तिकं गृहीत्वा,—

"ॐ स्वस्तिन इन्द्रो वृद्धश्रवाः स्वस्तिनः पूषा विश्ववेदाः स्वस्तिन स्तार्क्ष्यो रिष्टनेमिः स्वस्तिनो बृहस्पतिर्दधातु"।११।

सिन्दूरं गृहीत्वा,—

"ॐ सिन्धोरिव प्राध्वने शूघनासो वातप्रमीय पतयन्तु घृतस्य धारा अरुषोण वाजी काष्ठाभिन्दन्नुर्तिमिभिः पिन्वमानः"। अत्र "वातप्रमीय पतयन्ति जङ्घा"। इत्यपि पठन्ति।१२।

शङ्खं गृहीत्वा,—

"ॐ प्रतिश्रुत्काया अर्त्तनं घोषाय भयमन्ताय बहुवादिनमनन्ताय मूकꣳ शब्दायाडम्बराघातं महसे वीणावादं क्रोशाय तूणवध्ममवरस्पराय शङ्खध्मं वनाय वनपमन्यतोऽरण्याय दावपं"।१३।

कज्जलं गृहीत्वा,—

"ॐ समिद्धोऽञ्जन कृदरं मतीनां घृतमग्ने मधुमत् पिन्वमानः वाजीवहन् वाजिनं जातवेदो देवानां वक्षिप्रियमासधस्थं"।१४।

रोचनां गृहीत्वा,—

"ॐ युञ्जन्ति ब्रध्नमरुषं चरन्तं परितस्थुषः रोचन्ते रोचना दिवि"।१५।

सिद्धान्नं गृहीत्वा,—

"ॐ अन्नपते अन्नस्य नो धेह्यनमीवस्य शुष्मिणः। प्रदातारं तारिषऊर्जं नो धेहि द्विपदे शं चतुष्पदे। सिद्धान्नमत्र आतपतण्डुलाः"।१६।

काञ्चनं गृहीत्वा,—

"ॐ हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीत्। सदाधारः पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम।१७।"

रजतं गृहीत्वा,—

"ॐ तेजोसि शुक्रमस्यमृतमसि धामनामासि प्रियं देवानामनाधृष्टं देवयजनं"।१८।

ताम्रं गृहीत्वा,—

"ॐ असौ यस्ताम्रोऽरुण उतवभ्रुः सुमङ्गलः ये चेनꣳ रुद्रा अभितो दिक्षु श्रिताः सहस्रशो वैषाꣳ हेलइमहे"।१९।

सिद्धार्थं गृहीत्वा,—

"ॐ रक्षोहनो बलगहनः प्रोक्षामि वैष्णवान् रक्षोहनो बलगहनो बलयामि वैष्णवान् रक्षोहनो बलगहनोऽवस्तृणामि वैष्णवान् रक्षोहनौ वनगहना उपधामि वैष्णवी रक्षोहणौ वनगहनौ पर्य्यूहामि वैष्णवी वैष्णवमसि वैष्णवास्थ"।२०।

दर्पणं गृहीत्वा,

"ॐ आकृष्णेन रजसा वर्त्तमानो निवेशयन्नमृतं मर्त्यञ्च हिरण्ययेन सविता रथेना देवोयाति भुवनानि पश्यन्"।२१।

दीपं गृहीत्वा,—